# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा**–आचार्य (SEM-3) | **प्रश्नपत्रम्**–२ (New & Old) | **गुणाः** – ७० |
| **विषयः** – पुराणेतिहासः | **कोड**- **CC- 5.3.7.** | **समयः** – १० तः १ |
| **दिनाङ्कः** – ०५/१२/२०१८ | **सन्दर्भग्रन्थः**– महाभारते वनपर्व (अध्यायाः २७३–२९९) | |

**॥ प्रथमान्वितिः ॥**

**प्र–१ पद्यमेकं सप्रसङ्गं ससन्दर्भं विवेचयत ।** **०५**

१. कस्मिन् रामः कुले जातः किं वीर्यः किम्पराक्रमः ।
रावणः कस्य पुत्रो वा किं वैरं तस्य तेन ह ॥

२. आभिषेचनिकं यत् ते रामार्थमुपकल्पितम् ।
भरतस्तदवाप्नोतु वनं गच्छतु राघवः ॥

**प्र–२ भगवतः रामस्य वनगमनप्रसङ्गं यथाग्रन्थं लिखत ।** **१०**

**अथवा**

**मारीचवधं सीताहरणस्य महाभारतानुसारं सविस्तरं लिखत ।**

**॥ द्वितीयान्वितिः ॥**

**प्र–३ पद्यमेकं सप्रसङ्गं ससन्दर्भं विवेचयत ।** **०५**

१. रामस्तु शरजालानि ववर्ष जलदो यथा ।
तानि लङ्कां समासाद्य जघ्नुस्तान् रजनीचरान् ॥

२. ततोऽब्रवीद् दशग्रीवः कुम्भकर्णं महाबलम् ।
धन्योऽसि यस्य ते निद्रा कुम्भकर्णेयमीदृशी ॥

**प्र–४ रामायणयुद्धं महाभारतानुसारं सविस्तरं वर्ण्यताम् ।** **१०**

**अथवा**

**इन्द्रजीतलक्ष्मणयुद्धं पाठ्यग्रन्थानुसारं सविस्तरं प्रतिपादयत ।**

**॥ तृतीयान्वितिः ॥**

**प्र–५ एकस्य श्लोकस्य सप्रसङ्गं विवेचनं कुरुत ।** **०५**

१. अप्रदाता पिता वाच्यो वाच्यश्चानुपचन् पतिः ।
मृते भर्तरि पुत्रश्च वाच्यो मातुररक्षिता ॥

२. मनसा निश्चयं कृत्वा ततो वाचाभिधीयते ।
क्रियते कर्मणा पश्चात् प्रमाणं मे मनस्ततः ॥

**प्र-६ सावित्रीविवाहप्रसङ्गं यथाग्रन्थं सविस्तरं लिखत ।** **१०**

**अथवा**

**सत्यवता सह सावित्र्याः वनगमनं सविस्तरं लिखत ।**

**प्र-७ एकां टिप्पणीं लिखत ।** **०५**

१. यमसावित्रीसंवादः ।

२. सावित्र्याः जीवनसंघर्षः ।

**॥ चतुर्थान्वितिः ॥**

**प्र-८ यमद्वारा वरप्रदानप्रसङ्गं सविस्तरं प्रतिपादयत ।** **१०**

**अथवा**

**द्युमत्सेनस्य राज्याभिषेकवर्णनं कृत्वा सावित्रीकृतां सेवां वर्णयत ।**

**प्र-९ दशप्रश्नानां लघूत्तराणि यच्छत ।** **१०**

१. दशग्रीवः नाम कः ?

२. रावणस्य कस्मात् भयं भवेदिति ब्रह्मणा प्रोक्तम्?

३. कैकेयी कस्य माता आसीत्?

४. हव्यवाहः कः देवः?

५. सुवर्णमृगरूपं केन राक्षसेन धृतम्?

६. रावणेन सीता कुत्र स्थापिता?

७. त्रिजटा का आसीत्?

८. सावित्र्याः पितुः नाम किम्?

९. सावित्रीति नाम कस्मात् कृतम्?

१०.सत्यवत अपरं नाम किम् आसीत्?

११.स्नुषा – इत्यस्य कोऽर्थः?

१२.कस्य शिरसि वेदना अजायत?

१३.चतुर्वर्षशतायुः कः सञ्जातः?

१४.शाल्वदेशस्य राजा क आसीत्?

१५.मैथिली नाम का?

--००--